श्रीरामचन्द्राय नमः
श्री सीतायै नमः
सूत उवाच

एकदा नैमिषारण्ये शौनाकाद्या महर्षयः।
नारदं परिपप्रच्छ कथां परं पावनीम्॥
कथयस्व महाबाहो स्तवं च परमं परम्।
यस्य श्रवण मात्रेण सर्वपापैः प्रमुच्यते॥

श्रीनारद उवाच

सीता स्तोत्रं प्रवक्ष्यामि सर्वपाप प्रणाशनम्।
सीता च जानकी चैव मैथिली राघवप्रिया॥
लोकमाता जगद्धात्री कुशस्य जननी शुभा।
वैदेही वेदमाता च सावित्री भुवनेश्वरी॥
रामस्य महिषी पुण्या सर्वपाप प्रणाशिनी।
अयोनिजा महाविद्या महापातकनाशिनी॥
नमस्तस्यै जगन्मात्रे सीतायै च नमो नमः।
इदं स्तवं महापुण्यं महापातकनाशनम्॥
यः पठेद्ध्यातरुत्थाय वैष्णवस्तोत्रमुत्तमम्।
सर्वपापविमुक्तात्मा विष्णुलोकं स गच्छति॥
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम्।
मोक्षार्थी मोक्षमाप्नोति कन्याविन्दति सत्पतिम्॥
तस्य गृहं सदा लक्ष्मी सर्वदेवनमुञ्चति।
दातव्यं भक्तियुक्ताय शिष्याय विदितात्मने॥
दाम्भिकाय न दातव्यं भक्तिहीनाय सर्वदा।
गोपनीयमिदं स्तोत्रं त्रिषुलोकेषु दुर्लभम्॥

इति श्रीसीतास्तोत्रं समाप्तम् ।